६९. भट्टिकाव्यस्य नामान्तरं किम्? टीकाकारेण मल्लिनाथेन अस्य महाकाव्यस्य किं नाम दत्तम्।

➡ उत्तरम्— भट्टिकाव्यस्य नामान्तरं रावणवधमहाकाव्यं रामचरितमहाकाव्यञ्चेति। टीकाकारेण उदाहरणकाव्यं नाम दत्तम्।

७०. रावणवधमहाकाव्यस्य उत्सः कः?

➡ उत्तरम्— रावणवधमहाकाव्यस्य उत्सः वाल्मीकिकृतं रामायणम्।

७१. भट्टिकाव्ये कियन्तः सर्गाः सन्ति? अस्मिन् महाकाव्ये कियन्तः श्लोकाः सन्ति?

➡ उत्तरम्— भट्टिकाव्ये द्वाविंशति सर्गाः सन्ति। अस्मिन् महाकाव्ये १३८५ श्लोकाः सन्ति।

७२. भट्टिकाव्यस्य टीका केन विरचिता? तस्याः टीकायाः नाम किम्?

➡ उत्तरम्— मल्लिनाथेन भट्टिकाव्यस्य टीका विरचिता। तस्याः टीकायाः नाम सर्वपथीन्।

७३. भट्टिकाव्ये कियन्तः विभागाः सन्ति? ते च के?

➡ उत्तरम्— भट्टिकाव्ये चत्वारः विभागाः सन्ति। ते यथा— प्रकीर्णकाण्डम्, अधिकारकाण्डं प्रसन्नकाण्डं तिडन्तकाण्डं चेति।

७४. भट्टिकाव्यस्य मुख्यरसः कः?

➡ उत्तरम्— भट्टिकाव्यस्य मुख्यरसः वीररसः।

७५. भर्तृहरेः भट्टिकाव्यस्य रचनायाः उद्देश्यं किम्?

➡ उत्तरम्— काव्यमाध्यमेन छात्राणां व्याकरणशिक्षा एव भट्टिकाव्यस्य मूलमुद्देश्यम्।

७६. भट्टिकाव्यस्य नायिका-नायकौ कौ स्तः?

➡ उत्तरम्— नायकः रामचन्द्रः नायिका च सीता।

७७. भट्टिकाव्यस्य द्वितीयसर्गस्य नाम किम्? तस्मिन् सर्गे वर्णनीयः विषयः कः?

➡ उत्तरम्— भट्टिकाव्यस्य द्वितीयसर्गस्य नाम सीतापरिणयः। तस्मिन् सर्गे वर्णनीयः विषयः शरद्वर्णनम्।

७८. श्रीहर्षेण विरचितं काव्यं किम्?

➡ उत्तरम्— श्रीहर्षेण विरचितं काव्यं नैषधचरितम्।

७९. श्रीहर्षस्य समयकालः कः?

➡ उत्तरम्— श्रीहर्षस्य समयकालः ख्रीष्टीयः द्वादशशतकः।

८०. श्रीहर्षस्य पितरौ कौ आस्ताम्?

➡ उत्तरम्— श्रीहर्षस्य पितरौ श्रीहरि-मामल्लदेव्यौ आस्ताम्।

८१. श्रीहर्षस्य मातुलः कः आसीत्?

➡ उत्तरम्— श्रीहर्षस्य मातुलः मम्मटाचार्य आसीत्।

८२. नैषधचरिते कियन्तः सर्गाः सन्ति?

➡ उत्तरम्— नैषधचरिते द्वाविंशति सर्गाः सन्ति।

८३. नैषधचरितमहाकाव्यस्य विषयः कः?

➡ उत्तरम्— नैषधचरितमहाकाव्यस्य विषयः नल-दमयन्तयोः प्रेम्णः वृत्तान्तः।

८४. नैषधचरितमहाकाव्यस्य नायक-नायिकयोः नाम किम्?
- उत्तरम्— नायकः निषेधराजः नलः, नायिका च दमयन्ती।

८५. नैषधचरितस्य मुख्यरसः कः?
- उत्तरम्— नैषधचरितस्य मुख्यरसः शृङ्गाररसः।

८६. 'नैषधचरितम्' इति महाकाव्ये नैषधः कः आसीत्?
- उत्तरम्— 'नैषधचरितम्' इति महाकाव्ये नैषधः हि निषेधराजः नलः।

८७. श्रीहर्षस्य प्रियः अलङ्कारः कः ?
- उत्तरम्— श्रीहर्षस्य प्रियः अलङ्कारः उत्प्रेक्षालङ्कारः।

८८. श्रीहर्षेण विरचितः दार्शनिकः ग्रन्थः कः?
- उत्तरम्— श्रीहर्षेण विरचितः दार्शनिकः ग्रन्थः खण्डनखण्डखाद्यम्।

८९. नलः केषां दूतरूपेण दमयन्तीसकाशं प्रेषितवान्?
- उत्तरम्— नलः इन्द्रादिदेवचतुष्टयस्य दूतरूपेण दमयन्तीसकाशं प्रेषितवान्।

९०. नैषधचरितस्य प्रधान-टीका का?
- उत्तरम्— भरतमल्लिकेन विरचिता 'सुबोधा' टीका नैषधचरितस्य प्रधाना।